# Shri Varadanarayana Prarthana

# શ્રીવરદનારાયણ પ્રાર્થના

## Document Information

Text title : Varadanarayana Prarthana

File name : varadanArAyaNaprArthanA.itx

Category : vishhnu, varadAnanda

Location : doc_vishhnu

Author : Swami Varadananda Bharati (Pracharya A. D. AThavale)

Description/comments : Vishnu Sahasranama, last page. See derived 108 nAmAvalI

Acknowledge-Permission: Shri Dasganu Maharaj Pratishthan, Gorte https://www.santkavidasganu.org

Latest update : April 23, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 11, 2023

*sanskritdocuments.org*

# શ્રીવરદનારાયણ પ્રાર્થના

પદ્માસનાય મણિકુણ્ડલ શોભિતાય
    ભાસ્વજ્જટામુકુટમણ્ડિતમસ્તકાય ।
લક્ષ્મીવરાય જનપાલન તત્પરાય
    નારાયણાય બદરીપતયે નમોઽસ્તુ ॥ ૧॥

ધ્યાનસ્થિતાય સરસીરુહલોચનાય
    વિદ્યુત્પ્રભાયુતપયોધરસન્નિભાય ।
મન્દસ્મિતેન્દુવદનાય ચતુર્ભુજાય
    નારાયણાય બદરીપતયે નમોઽસ્તુ ॥ ૨॥

સર્વાય તાપશમનાય નતપ્રિયાય
    ભવ્યાય ભૂતજનકાય સુરોત્તમાય ।
શર્વાય સર્વદમનાય મનોહરાય
    નારાયણાય બદરીપતયે નમોઽસ્તુ ॥ ૩॥

વ્યાસોદ્ધવાદિવરદાય દયામયાય
    બ્રહ્માત્મજપ્રમુખસન્મુનિસંસ્તુતાય ।
શ્રીશઙ્કરેણ પુનરાહિતવિગ્રહાય
    નારાયણાય બદરીપતયે નમોઽસ્તુ ॥ ૪॥

લક્ષ્મીસુપર્ણધનદાર્જુનસેવિતાય
    સૂર્યાર્ચિતાય મરુતાત્મજવન્દિતાય ।
ભક્તાર્ચિષે નરસખાય સુખપ્રદાય
    નારાયણાય બદરીપતયે નમોઽસ્તુ ॥ ૫॥

નન્દપ્રિયાય કપિલાય સનાતનાય
    દક્ષાય નૈકસુખદાય ગદાગ્રજાય ।
શ્રીવિઠ્ઠલાય હિમશૈલવરે સ્થિતાય
    નારાયણાય બદરીપતયે નમોઽસ્તુ ॥ ૬॥

ગોવિન્દ માધવ મુકુન્દ નિતાન્તકાન્ત-
  નામપ્રિયાય સુલભાય કૃપાઘનાય ।
સત્યાય ભક્તહિતબોધપરાયણાય
  નારાયણાય બદરીપતયે નમોઽસ્તુ ॥ ૭॥

નિત્યાય સર્વગતયે જગદીશ્વરાય
  મૂર્તાય યજ્ઞપતયે નિરુપાધિકાય ।
દેવાય વેદમતયેઽમિતવિક્રમાય
  નારાયણાય બદરીપતયે નમોઽસ્તુ ॥ ૮॥

ગોપાય વીરવિજયાય ધરાધરાય
  બીજાય સુવ્રતકરાય મહાધનાય ।
ઈજ્યાય લોકગુરવે ગરુડધ્વજાય
  નારાયણાય બદરીપતયે નમોઽસ્તુ ॥ ૯॥

કૌમોદકીદરસુદર્શનનન્દકાદિ-
  દિવ્યાયુધપ્રહરણાય મહાક્રમાય ।
ત્રૈલોક્યમઙ્ગલકરાય રમેશ્વરાય
  નારાયણાય બદરીપતયે નમોઽસ્તુ ॥ ૧૦॥

રામાય સત્યતરધર્મવિદુત્તમાય
  પ્રાણાય બુદ્ધિકરણાય શુભેક્ષણાય ।
શુદ્ધાત્મને કરણકાર્યકૃતેઽવ્યયાય
  નારાયણાય બદરીપતયે નમોઽસ્તુ ॥ ૧૧॥

પ્રેમ્ણાસ્વભક્તજનવાઞ્છિતપૂરણાય
  સન્દર્શિતાત્મવપુષે નતવત્સલાય ।
સ્નિગ્ધપ્રસન્નહસિતાય હિતોત્તમાય
  નારાયણાય બદરીપતયે નમોઽસ્તુ ॥ ૧૨॥

સ્પર્શેન દિવ્યમૃદુના કરનીરજસ્ય
  સંવર્ધકાય ચરણાનતભાગ્યરાશેઃ ।
સઞ્જીવકાય જનકાય ચ પાલકાય
  નારાયણાય બદરીપતયે નમોઽસ્તુ ॥ ૧૩॥

તેજોમયાય કરુણામૃતસાગરાય

નિષ્કારણાય વરદાય ચ નિસ્તુલાય ।
કલ્પદ્રુમાય સુખદાય નિરામયાય
નારાયણાય બદરીપતયે નમોઽસ્તુ ॥ ૧૪॥

ભોઃ પાહિ પાહિ ભગવન્ શરણાગતં મામ્
બુદ્ધિં સ્થિરાં કુરુ સદૈવ મનઃ પ્રસન્નમ્ ।
નિત્યં મદીય રસનાગ્રરસાઙ્ગણેઽસ્મિન્
નારાયણાય બદરીપતયે નમોઽસ્તુ ॥ ૧૫॥

ઇતિ સ્વામી વરદાનન્દભારતીવિરચિતં શ્રીવરદનારાયણ પ્રાર્થના સમ્પૂર્ણા ।

ૐ શ્રીઃ સ્વસ્તિ ।

ભાવાર્ચના (પ્રાચાર્ય અ. દા. આઠવલે)

https://www.santkavidasganu.org, https://www.youtube.com/@varad-vani1496

Eન્ચોદેદ્ અન્દ્ પ્રૂફ઼્ેઅદ્ બ્ય્ Pરીતિ Bહન્દરે

*Shri Varadanarayana Prarthana*

pdf was typeset on August 11, 2023

Please send corrections to *sanskrit@cheerful.com*